# Rudrakritam Vishnu Stotram

# રુદ્રકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Rudarakritam Vishnu Stotram

File name : rudrakRRitaMviShNustotram.itx

Category : vishhnu, vishnu, stotra, varAhapurANa

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : varAhapurANa | adhyAya 73/17-37||

Latest update : September 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2024

*sanskritdocuments.org*

Rudrakritam Vishnu Stotram

# રુદ્રકૃતં વિષ્ણુસ્તોત્રમ્

રુદ્ર ઉવાચ ।
નમોઽસ્ત્વનન્તાય વિશુદ્ધચેતસે સરૂપરૂપાય સહસ્રબાહવે ।
સહસ્રરશ્મિપ્રવરાય વેધસે વિશાલદેહાય વિશુદ્ધકર્મિણે ॥ ૧૭॥

સમસ્તવિશ્વાર્તિહરાય શમ્ભવે સહસ્રસૂર્યાનિલતિગ્મતેજસે ।
સમસ્તવિદ્યાવિધૃતાય ચક્રિણે સમસ્તગીર્વાણનુતે સદાઽનઘ ॥ ૧૮॥

અનાદિદેવાચ્યુત શેષશેખર પ્રભો વિભો ભૂતપતે મહેશ્વર ।
મરુત્પતે સર્વપતે જગત્પતે ભુવઃ પતે ભુવનપતે સદા નમઃ ॥ ૧૯॥

જલેશ નારાયણ વિશ્વશઙ્કર ક્ષિતીશ વિશ્વેશ્વર વિશ્વલોચન ।
શશાઙ્કસૂર્યાચ્યુત વીર વિશ્વગાપ્રતર્ક્યમૂર્તેઽમૃતમૂર્તિરવ્યયઃ ॥ ૨૦॥

જ્વલદ્ધુતાશાર્ચિવિરુદ્ધમણ્ડલ પ્રપાહિ નારાયણ વિશ્વતોમુખ ।
નમોઽસ્તુ દેવાર્ત્તિહરામૃતાવ્યય પ્રપાહિ માં શરણગતં સદાચ્યુત ॥ ૨૧॥

વક્ત્રાણ્યનેકાનિ વિભો તવાહં પશ્યામિ મધ્યસ્થગતં પુરાણમ્ ।
બ્રહ્માણમીશં જગતાં પ્રસૂતિં નમોઽસ્તુ તુભ્યં તુ પિતામહાય ॥ ૨૨॥

સંસારચક્રભ્રમણૈરનેકૈઃ ક્વચિદ્ભવાન્ દેવવરાદિદેવ ।
સન્માર્ગિભિર્જ્ઞાનવિશુદ્ધસત્ત્વૈરુપાસ્યસે કિં પ્રલપામ્યહં ત્વામ્ ॥ ૨૩॥

એકં ભવન્તં પ્રકૃતેઃ પરસ્તાદ્યો વેત્ત્યસૌ સર્વવિદાદિબોદ્ધા ।
ગુણા ન તેષુ પ્રસભં વિભેદ્યા વિશાલમૂર્તિર્હિ સુસૂક્ષ્મરૂપઃ ॥ ૨૪॥

નિર્વાક્યો નિર્મનો વિગતેન્દ્રિયોઽસિ કર્માભવાન્નો વિગતૈકકર્મા ।
સંસારવાંસ્ત્વં હિ ન તાદૃશોઽસિ પુનઃ કથં દેવવરાસિ વેદ્યઃ ॥ ૨૫॥

મૂર્તામૂર્તં ત્વતુલં લભ્યતે તે પરં વપુર્દેવ વિશુદ્ધભાવૈઃ ।
સંસારવિચ્છિત્તિકરૈર્યજદ્ભિરતોઽવસીયેત ચતુર્ભુજસ્ત્વમ્ ॥ ૨૬॥

પરં ન જાનન્તિ યતો વપુસ્તે દેવાદયોઽપ્યદ્ભુતકારણં તત્ ।

અતોઽવતારોક્તતનું પુરાણમારાધયેયુઃ કમલાસનાદ્યાઃ ॥ ૨૭॥

ન તે વપુર્વિશ્વસૃગબ્જયોનિરેકાન્તતો વેદ મહાનુભાવઃ ।
પરં ત્વહં વેદ્મિ કવિં પુરાણં ભવન્તમાદ્યં તપસા વિશુદ્ધઃ ॥ ૨૮॥

પદ્માસનો મે જનકઃ પ્રસિદ્ધશ્ચૈતત્ પ્રસૂતાવસકૃત્પુરાણૈઃ ।
સમ્બોધ્યતે નાથ ન મદ્વિધોઽપિ વિદુર્ભવન્તં તપસા વિહીનાઃ ॥ ૨૯॥

બ્રહ્માદિભિસ્તત્પ્રવરૈરબોધ્યં ત્વાં દેવ મૂર્ખાઃ સ્વમનન્તનત્યા ।
પ્રબોધમિચ્છન્તિ ન તેષુ બુદ્ધિરુદારકીર્ત્તિષ્વપિ વેદહીનાઃ ॥ ૩૦॥

જન્માન્તરૈર્વેદવિદાં વિવેકબુદ્ધિર્ભવેન્નાથ તવ પ્રસાદાત્ ।
ત્વલ્લબ્ધલાભસ્ય ન માનુષત્વં ન દેવગન્ધર્વગતિઃ શિવં સ્યાત્ ॥ ૩૧॥

ત્વં વિષ્ણુરૂપોઽસિ ભવાન્ સુસૂક્ષ્મઃ સ્થૂલોઽસિ ચેદં કૃતકૃત્યતાયાઃ ।
સ્થૂલઃ સુસૂક્ષ્મઃ સુલભોઽસિ દેવ ત્વદ્બાહ્યવૃત્ત્યા નરકે પતન્તિ ॥ ૩૨॥

કિમુચ્યતે વા ભવતિ સ્થિતેઽસ્મિન્ ખાત્મ્યેન્દુવહ્ન્યર્કમહીમરુદ્ભિઃ ।
તત્ત્વૈઃ સતોયૈઃ સમરૂપધારિણ્યાત્મસ્વરૂપે વિતતસ્વભાવે ॥ ૩૩॥

ઇતિ સ્તુતિં મે ભગવન્નનન્ત જુષસ્વ ભક્તસ્ય વિશેષતશ્ચ ।
સૃષ્ટિં સૃજસ્વેતિ તવોદિતસ્ય સર્વજ્ઞતાં દેહિ નમોઽસ્તુ વિષ્ણો ॥ ૩૪॥

ચતુર્મુખો યો યદિ કોટિવક્ત્રો ભવેન્નરઃ ક્વાપિ વિશુદ્ધચેતાઃ ।
સ તે ગુણાનામયુતૈરનેકૈર્વદેત્તદા દેવવર પ્રસીદ ॥ ૩૫॥

સમાધિયુક્તસ્ય વિશુદ્ધબુદ્ધેસ્ત્વદ્ભાવભાવૈકમનોઽનુગસ્ય ।
સદા હૃદિસ્થોઽસિ ભવાન્નમસ્તે ન સર્વગસ્યાસ્તિ પૃથગ્વ્યવસ્થા ॥ ૩૬॥

ઇતિ પ્રકાશં કૃતમેતદીશ સ્તવં મયા સર્વગતં વિબુદ્ધ્વા ।
સંસારચક્રક્રમમાણયુક્ત્યા ભીતં પુનીહ્યચ્યુત કેવલત્વમ્ ॥ ૩૭॥

ઇતિ વરાહપુરાણે ત્રિસ્સપ્તતિતમાધ્યાયાન્તર્ગતં રુદ્રકૃતં
વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

વરાહપુરાણ । અધ્યાય ૭૩/૧૭-૩૭॥

varAhapurANa . adhyAya 73/17-37..

Proofread by PSA Easwaran

*Rudrakritam Vishnu Stotram*

pdf was typeset on September 4, 2024

Please send corrections to *sanskrit@cheerful.com*